# 23 - त्रयोविंश दशकम्

## चित्रकेतु चरितम्

प्राचेतसस् तु भगवन् नपरो हि दक्षः
त्वत् सेवनं व्यधित सर्ग विवृद्धि कामः ।
आविर्बभूविथ तदा लसदष्ट बाहुः
तस्मै वरं ददिथ तां च वधू मसिक्नीम् ॥ ॥23-1॥

तस्यात्मजास् त्वयुत मीश पुनस् सहस्रं
श्रीनारदस्य वचसा तव मार्ग मापुः ।
नैकत्र वास मृषये स मुमोच शापं
भक्तोत्तमस् तु ऋषि रनुग्रह मेव मेने ॥ ॥23-2॥

षष्ट्या ततो दुहितृभिस् सृजतः कुलौघान्
दौहित्र सूनु रथ तस्य स विश्वरूपः ।
त्वत् स्तोत्र वर्मित मजापय दिन्द्रमाजौ
देव त्वदीय महिमा खलु सर्वजैत्रः ॥ ॥23-3॥

प्राक् शूरसेन विषये किल चित्रकेतुः
पुत्राग्रही नृपति रङ्गिरसः प्रभावात् ।
लब्ध्वैक पुत्र मथ तत्र हते सपत्नी
सङ्घै रमुह्य दवशस् तव माययासौ ॥ ॥23-4॥

तं नारदस्तु सम मङ्गिरसा दयालुः
सम्प्राप्य ताव दुप दर्श्य सुतस्य जीवम् ।
कस्यास्मि पुत्र इति तस्य गिरा विमोहं
त्यक्त्वा त्वदर्चन विधौ नृपतिं न्ययुङ्क्त ॥ ॥23-5॥

स्तोत्रं च मन्त्रमपि नारदतोऽथ लब्ध्वा
तोषाय शेष वपुषो ननु ते तपस्यन् ।
विद्याध राधिपतितां स हि सप्त रात्रे
लब्ध्वाप्य कुण्ठ मतिरन्व भजत् भवन्तम् ॥ ॥23-6॥

तस्मै मृणाल धवलेन सहस्र शीर्ष्णा
रूपेण बद्ध नुति सिद्धगणा वृतेन ।
प्रादुर्भवन् नचिरतो नुतिभिः प्रसन्नः
दत्वाऽऽत्म तत्त्व मनुगृह्य तिरोदधाथ ॥ ॥23-7॥

त्वत् भक्तमौलि रथ सोऽपि च लक्षलक्षं
वर्षाणि हर्षुलमना भुवनेषु कामम् ।
सङ्गापयन् गुणगणं तव सुन्दरीभिः
सङ्गातिरेक रहितो ललितं चचार ॥ ॥23-8॥

अत्यन्त सङ्ग विलयाय भवत् प्रणुन्नः
नूनं स रूप्य गिरिमाप्य महत् समाजे ।
निश्शङ्क मङ्क कृत वल्लभ मङ्गजारिं
तं शङ्करं परिहसन् नुमयाभिशेपे ॥ ॥23-9॥

निस्सम्भ्रमस् त्वय मयाचित शाप मोक्षः
वृत्रासुरत्व मुपगम्य सुरेन्द्र योधी ।
भक्त्यात्म तत्त्व कथनैस् समरे विचित्रं
शत्रोरपि भ्रम मपास्य गतः पदं ते ॥ ॥23-10॥

त्वत् सेवनेन दिति रिन्द्र वधोद्यताऽपि
तान् प्रत्युतेन्द्र सुहृदो मरुतोऽभिलेभे ।
दुष्टाशयेऽपि शुभदैव भवन् निषेवा
तत् तादृशस् त्वमव मां पवनालयेश ॥ ॥23-11॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥